શ્રીમદ્ ભાગવત નો આ સાર
ભગવદ્ ભક્તિ જ આધાર

# શ્રીમદ્ ભાગવત રસિક કુટુંબ

## ઉદ્ધવ ગીતા – પ્રથમ સોપાન



સ્વધામ પ્રસ્થાન કરવા જુઓ થઈ રહ્યા શ્રી કૃષ્ણ તૈયાર ।
ઉદ્ધવ સમક્ષ રજુ કર્યા અદ્‌ભુત ઉદ્‌ગાર ॥

નારાયણં(ન્) નમસ્કૃત્ય, નરં(ન્) ચૈવ નરોત્તમમ્ ।
દેવીં(મ્) સરસ્વતીં(મ્) વ્યાસં(ન્), તતો જયમુદીરયેત્

નામસઙ્કીર્તનં(મ્) યસ્ય, સર્વપાપપ્રણાશનમ્ ।
પ્રણામો દુખશમનસ્, તં(ન્) નમામિ હરિં(મ્) પરમ્

॥ ૐ નમો ભગવતે વાસુદેવાય ॥
એકાદશઃ સ્કન્ધ
॥ અથ ષષ્ઠોઽધ્યાયઃ ॥

શ્રીશુક ઉવાચ

અથ બ્રહ્માઽઽત્મજૈર્દેવૈઃ(ફ્), પ્રજેશૈરાવૃતોઽભ્યગાત્ ।
ભવશ્ચ ભૂતભવ્યેશો, યયૌ ભૂતગણૈર્વૃતઃ ॥૧॥

બ્રહ્માઽઽત્મ + જૈર્ + દેવૈઃ, પ્રજેશૈરા + વૃતોઽભ્યગાત,
ભૂત + ભવ્યેશો, ભૂતગણૈર્ + વૃતઃ

શ્રીમદ્ ભાગવત નો આ સાર
ભગવદ્ ભક્તિ જ આધાર

ઈન્દ્રો મરુદ્ભિર્ભગવા – નાદિત્યા વસવોઽશ્વિનૌ ।
ઋભવોઽઙ્ગિરસો રુદ્રા, વિશ્વે સાધ્યાશ્ચ દેવતાઃ ।।૨।।

મરુદ્ + ભિર્ + ભગવા, ઋભવોઙ્ + ગિરસો

ગન્ધર્વાપ્સરસો નાગાઃ(સ્), સિદ્ધચારણગુહ્યકાઃ ।
ઋષયઃ(ફ્) પિતરશ્ચૈવ, સવિદ્યાધરકિન્નરાઃ ।।૩।।

ગન્ધર્વાપ્ + સરસો, સિદ્ધ + ચારણ + ગુહ્યકાઃ, સવિદ્યા + ધર + કિન્નરાઃ

દ્વારકામુપસ(ઞ્)જગ્મુઃ(સ્), સર્વે કૃષ્ણદિદૃક્ષવઃ ।
વપુષા યેન ભગવાન્, નરલોકમનોરમઃ ।
યશો વિતેને લોકેષુ, સર્વલોકમલાપહમ્ ।।૪।।

દ્વારકા + મુપ + સ(ઞ્)જગ્મુઃ(સ્), કૃષ્ણદિ + દૃક્ષવઃ, નર + લોક + મનોરમઃ, સર્વલો + કમલા + પહમ્

તસ્યાં(મ્) વિભ્રાજમાનાયાં(મ્), સમૃદ્ધાયાં(મ્) મહર્દ્ધિભિઃ ।
વ્યચક્ષતાવિતૃપ્તાક્ષાઃ(ખ્), કૃષ્ણમદ્ભુતદર્શનમ્ ।।૫।।

વિભ્રા + જમા + નાયાં(મ્), મહર્દ્ + ધિભિઃ, વ્યચક્ષતા + વિતૃપ્ + તાક્ષાઃ(ખ્), કૃષ્ણ + મદ્ +ભુતદર્શનમ્

સ્વર્ગોદ્યાનોપગૈર્માલ્યૈશ્ – છાદયન્તો યદૂત્તમમ્ ।
ગીર્ભિશ્ચિત્રપદાર્થાભિસ્ – તુષ્ટુવુર્જગદીશ્વરમ્ ।।૬।।

સ્વર્ગો + દ્યાનો + પગૈર્ + માલ્યૈશ્, યદૂત્ + તમમ્
ગીર્ + ભિશ્ + ચિત્ર + પદાર્થા + ભિસ્, તુષ્ટુવુર્ + જગદીશ્વરમ્

દેવા ઊચુઃ
નતાઃ(સ્) સ્મ તે નાથ પદારવિન્દં(મ્),
બુદ્ધીન્દ્રિયપ્રાણમનોવચોભિઃ ।
યચ્ચિન્ત્યતેઽન્તર્હૃદિ ભાવયુક્તૈર્ –
મુમુક્ષુભિઃ(ખ્) કર્મમયોરુપાશાત્ ।।૭।।

બુદ્ધીન્દ્રિય + પ્રાણ + મનો + વચોભિઃ, યચ્ + ચિન્ત્યતેઽન્તર્ + હૃદિ, કર્મ + મયો + રુપાશાત્

શ્રીમદ્ ભાગવત નો આ સાર
ભગવદ્ ભક્તિ જ આધાર

ત્વં(મ્) માયયા ત્રિગુણયાડડત્મનિ દુર્વિભાવ્યં(મ્),
વ્યક્તં સૃજસ્યવસિ લુમ્પસિ તદ્ગુણસ્થઃ ।
નૈતૈર્ભવાનજિત કર્મભિરજ્યતે વૈ,
યત્ સ્વે સુખેડવ્યવહિતેડભિરતોડનવદ્યઃ ॥૮॥

દુર્ + વિભાવ્યં(મ્), સૃજસ્ + યવસિ, નૈતૈર્ + ભવાન + જિત,
કર્મ + ભિરજયતે, સુખેડ + વ્યવહિતેડ + ભિરતોડ + નવદ્યઃ

શુદ્ધિર્નૃણાં(ન્) તુ તથેડય દુરાશયાનાં(મ્),
વિદ્યાશ્રુતાધ્યયનદાનતપઃ(ખ્) ક્રિયાભિઃ ।
સત્ત્વાત્મનામૃષભ તે યશસિ પ્રવૃદ્ધ –
સચ્છ્રદ્ધયા શ્રવણસમ્ભૃતયા યથા સ્યાત્ ॥૯॥

શુદ્ધિર્ + નૃણાં(ન્), વિદ્યા + શ્રુતા + ધ્યયન + દાનતપઃ(ખ્)
સત્ત્વાત્ + મના + મૃષભ, શ્રવણ + સમ્ + ભૃતયા

સ્યાન્નસ્તવાઙ્ઘ્રિરશુભાશયધૂમકેતુઃ(હ્),
ક્ષેમાય યો મુનિભિરાર્દ્રહૃદોહ્યમાનઃ ।
યઃ(સ્) સાત્વતૈઃ(સ્) સમવિભૂતય આત્મવદ્ભિર –
વ્યૂહેડર્ચિતઃ(સ્) સવનશઃ(સ્) સ્વરતિક્રમાય ॥૧૦॥

સ્યાન્ + નસ્તવાઙ્ઘ્રિ + રશુભા + શય + ધૂમકેતુઃ(હ્)
મુનિભિ + રાર્દ્ર + હૃદોહ્ + યમાનઃ, સ્વ + રતિ + ક્રમાય

યશ્ચિન્ત્યતે પ્રયતપાણિભિરધ્વરાગ્નૌ,
ત્રય્યા નિરુક્તવિધિનેશ હવિર્ગૃહીત્વા ।
અધ્યાત્મયોગ ઉત યોગિભિરાત્મમાયાં(ઞ્),
જિજ્ઞાસુભિઃ(ફ્) પરમભાગવતૈઃ(ફ્) પરીષ્ટઃ ॥૧૧॥

યશ્ + ચિન્ત્યતે, પ્રયત + પાણિ + ભિર + ધ્વરાગ્નૌ, નિરુક્ત + વિધિનેશ
યોગિ + ભિરાત્મ + માયાં(ઞ્),પરમ + ભાગવતૈઃ(ફ્)

શ્રીમદ્ ભાગવત નો આ સાર
ભગવદ્ ભક્તિ જ આધાર

પર્યુષ્ટયા તવ વિભો વનમાલયેયં(મ્),
સં(વ્)સ્પર્ધિની ભગવતી પ્રતિપત્નિવચ્છ્રીઃ ।
યઃ(સ્) સુપ્રણીતમમુયાર્હણમાદદન્નો,
ભૂયાત્ સદાઙ્ઘ્રિરશુભાશયધૂમકેતુઃ ॥૧૨॥

વનમા + લયેયં(મ્), પ્રતિ + પત્નિ + વચ્છ્રીઃ, સુપ્રણીત + મમુયાર્ + હણમા + દદન્નો
સદાઙ્ + ઘ્રિરશુભા + શય + ધૂમકેતુઃ

કેતુસ્ત્રિવિક્રમયુતસ્ત્રિપતત્પતાકો,
યસ્તે ભયાભયકરોડસુરદેવચમ્વોઃ ।
સ્વર્ગાય સાધુષુ ખલેષ્વિતરાય ભૂમન્,
પાદઃ(ફ્) પુનાતુ ભગવન્ ભજતામઘં(ન્) નઃ ॥૧૩॥

કેતુસ્ત્રિ + વિક્રમ + યુતસ્ત્રિ + પતત્ + પતાકો
ભયા્ + ભયકરોડ + સુરદેવ + ચમ્વોઃ, + ખલેષ + વિતરાય, ભજતા + મઘં(ન્)

નસ્યોતગાવ ઈવ યસ્ય વશે ભવન્તિ,
બ્રહ્માદયસ્તનુભૃતો મિથુરર્દ્યમાનાઃ ।
કાલસ્ય તે પ્રકૃતિપૂરુષયોઃ(ફ્) પરસ્ય,
શં(ન્) નસ્તનોતુ ચરણઃ(ફ્) પુરુષોત્તમસ્ય ॥૧૪॥

નસ્યો + તગાવ, બ્રહ્મા + દયસ્ + તનુભૃતો, મિથુરર્ + દ્યમાનાઃ
પ્રકૃતિપૂ + રુષયોઃ(ફ્), પુરુષોત્ + તમસ્ય

અસ્યાસિ હેતુરુદયસ્થિતિસંયમાના –
મવ્યક્તજીવમહતામપિ કાલમાહુઃ ।
સોડયં(ન્) ત્રિણાભિરખિલાપચયે પ્રવૃત્તઃ(ખ્),
કાલો ગભીરરય ઉત્તમપૂરુષસ્ત્વમ્ ॥૧૫॥

હેતુરુદય+ સ્થિતિસં(ય્)ય + માના, મવ્યક્ત + જીવ + મહતા + મપિ
ત્રિણા + ભિરખિલા + પચયે, ઉત્તમપૂ + રુષસ્ + ત્વમ્

શ્રીમદ્ ભાગવત નો આ સાર
ભગવદ્ ભક્તિ જ આધાર

ત્વત્તઃ(ફ્) પુમાન્ સમધિગમ્ય યયા સ્વવીર્ય(ન્),
ધત્તે મહાન્તમિવ ગર્ભમમોઘવીર્યઃ ।
સોઽયં(ન્) તયાનુગત આત્મન આણ્ડકોશં(મ્),
હૈમં(મ્) સસર્જ બહિરાવરણૈરુપેતમ્ ॥૧૬॥

ગર્ભ + મમોઘ + વીર્યઃ, બહિરા + વરણૈ + રુપેતમ્

તત્તસ્થુષશ્ચ જગતશ્ચ ભવાનધીશો,
યન્માયયોત્થગુણવિક્રિયયોપનીતાન્ ।
અર્થા(ઞ્)જુષન્નપિ હૃષીકપતે ન લિપ્તો,
યેઽન્યે સ્વતઃ(ફ્) પરિહૃતાદપિ બિભ્યતિ સ્મ ॥૧૭॥

તત્ + તસ્થુ + ષશ્ચ, યન્ + માયયોત્થ + ગુણ + વિક્રિયયો + પનીતાન્
અર્થા( ઞ્) + જુષન્ + નપિ, પરિહૃતા + દપિ

સ્માયાવલોકલવદર્શિતભાવહારિ -
ભ્રૂમણ્ડલપ્રહિતસૌરતમન્ત્રશૌણ્ડૈઃ ।
પત્ન્યસ્તુ ષોડશસહસ્ત્રમનં(ઙ્)ગબાણૈર્ -
યસ્યેન્દ્રિયં(મ્) વિમથિતું(ઙ્) કરણૈર્ન વિભ્વ્યઃ ॥૧૮॥

સ્માયા + વલોક + લવદર્, શિત + ભાવહારિ, ભ્રૂમણ્ડલ + પ્રહિતસૌ ( રતમન્ત્ર + શૌણ્ડૈઃ
ષોડશ + સહસ્ર + મનં(ઙ્)+ ગબાણૈર્

વિભ્વ્યસ્તવામૃતકથોદવહાસ્ત્રિલોક્યાઃ(ફ્),
પાદાવનેજસરિતઃ(શ્) શમલાનિ હન્તુમ્ ।
આનુશ્રવં(મ્) શ્રુતિભિરઙ્ઘ્રિજમઙ્ગસઙ્ગૈસ્ -
તીર્થદ્વયં(મ્) શુચિષદસ્ત ઉપસ્પૃશન્તિ ॥૧૯॥

વિભ્વ્યસ્+ તવા + મૃતકથો + દવહાસ્ત્રિ + લોક્યાઃ(ફ્), પાદા + વને + જસરિતઃ(શ્)
શ્રુતિભિરઙ્ + ઘ્રિજમ(ઙ) + ગસઙ્ગૈસ્, તીર્થદ્ + વયં(મ્)

શ્રીમદ્ ભાગવત નો આ સાર
ભગવદ્ ભક્તિ જ આધાર

**બાદરાયણિરુવાચ**

ઇત્યભિષ્ટૂય વિબુધૈઃ(સ્) સેશઃ(શ્) શતધૃતિર્હરિમ્ ।
અભ્યભાષત ગોવિન્દં(મ્), પ્રણમ્યામ્બરમાશ્રિતઃ ॥૨૦॥

ઇત્યભિષ્ + ટૂય, શત + ધૃતિર્ + હરિમ્, પ્રણમ્યામ્બર + માશ્રિતઃ

**બ્રહ્મોવાચ**

ભૂમેર્ભારાવતારાય, પુરા વિજ્ઞાપિતઃ(ફ્) પ્રભો ।
ત્વમસ્માભિરશેષાત્મં(વ્)સ્ - તત્તથૈવોપપાદિતમ્ ॥૨૧॥

ભૂમેર્ + ભારા + વતારાય, ત્વમસ્મા + ભિર + શેષાત્ + મં(વ્)સ્, તત્ + તથૈવો + પપાદિતમ્

ધર્મશ્ચ સ્થાપિતઃ(સ્) સત્સુ, સત્યસન્ધેષુ વૈ ત્વયા ।
કીર્તિશ્ચ દિક્ષુ વિક્ષિપ્તા, સર્વલોકમલાપહા ॥૨૨॥

સત્ય + સન્ધેષુ, સર્વલો + કમલા + પહા

અવતીર્ય યદોર્વં(વ્)શે, બિભ્રદ્ રુપમનુત્તમમ્ ।
કર્માણ્યુદામવૃત્તાનિ, હિતાય જગતોઽકૃથાઃ ॥૨૩॥

રુપ+ મનુત્તમમ્, કર્માણ્યુદ્+ દામવૃત્તાનિ

યાનિ તે ચરિતાનીશ, મનુષ્યાઃ(સ્) સાધવઃ(ખ્) કલૌ ।
શ્રૃણ્વન્તઃ(ખ્) કીર્તયન્તશ્ચ, તરિષ્યન્ત્યઞ્જસા તમઃ ॥૨૪॥

કીર્તયન્ + તશ્ચ, તરિષ્ + યન્ત્યઞ્ + જસા

યદુવં(વ્)શેઽવતીર્ણસ્ય, ભવતઃ(ફ્) પુરુષોત્તમ ।
શરચ્છતં(મ્) વ્યતીયાય, પં(ઞ્)ચવિં(વ્)શાધિકં(મ્) પ્રભો ॥૨૫॥

યદુવં(વ્)શેઽ + વતીર્ણસ્ય, પં(ઞ્)ચ + વિં(વ્)શા + ધિકં(મ્)

નાધુના તેઽખિલાધાર, દેવકાર્યાવશેષિતમ્ ।
કુલં(ઞ્) ચ વિપ્રશાપેન, નષ્ટપ્રાયમભૂદિદમ્ ॥૨૬॥

દેવ + કાર્યા + વશેષિતમ્, નષ્ટ + પ્રાય + મભૂદિદમ્

શ્રીમદ્ ભાગવત નો આ સાર
ભગવદ્ ભક્તિ જ આધાર

તતઃ(સ્) સ્વધામ પરમં(મ્), વિશસ્વ યદિ મન્યસે ।
સલોકાંલ્લોકપાલાન્ નઃ(ફ), પાહિ વૈકુણ્ઠ કિં(ઙ્)કરાન્ ॥૨૭॥

સલોકાંલ્+ લોક્ + પાલાન્

**શ્રીભગવાનુવાચ**

અવધારિતમેતન્મે, યદાત્થ વિબુધેશ્વર ।
કૃતં(મ્) વઃ(ખ્) કાર્યમખિલં(મ્), ભૂમેર્ભારોઽવતારિતઃ ॥૨૮॥

અવધા+ રિતમે + તન્મે, ભૂમેર્ + ભારોઽ + વતારિતઃ

તદિદં(મ્ યાદવકુલં(મ્), વીર્યશૌર્યશ્રિયોદ્ધતમ્ ।
લોકં(ઞ્)જિઘૃક્ષદ્ રુદ્ધં(મ્) મે, વેલયેવ મહાર્ણવઃ ॥૨૯॥

વીર્ય + શૌર્ય + શ્રિયોદ્ + ધતમ્

યદ્યસં(વ્)હૃત્ય દૃપ્તાનાં(મ્), યદૂનાં(મ્) વિપુલં(ઙ્) કુલમ્ ।
ગન્તાસ્મ્યનેન લોકોઽય - મુદ્વેલેન વિનઙ્ક્ષ્યતિ ॥૩૦॥

યદ્ય + સં(વ્)હૃત્ય, ગન્તાસ્ + મ્યનેન, મુદ્ + વેલેન

ઇદાનીં(ન્) નાશ આરબ્ધઃ(ખ્), કુલસ્ય દ્વિજશાપતઃ ।
યાસ્યામિ ભવનં(મ્) બ્રહ્મન્ - નેતદન્તે તવાનઘ ॥૩૧॥

**શ્રીશુક ઉવાચ**

ઇત્યુક્તો લોકનાથેન, સ્વયમ્ભૂઃ(ફ) પ્રણિપત્ય તમ્ ।
સહ દેવગણૈર્દેવઃ(સ્), સ્વધામ સમપદ્યત ॥૩૨॥

દેવ + ગણૈર્ + દેવઃ(સ્)

અથ તસ્યાં(મ્) મહોત્પાતાન્, દ્વારવત્યાં(મ્) સમુત્થિતાન્ ।
વિલોક્ય ભગવાનાહ, યદુવૃદ્ધાન્ સમાગતાન્ ॥૩૩॥

મહોત્ + પાતાન્, દ્વાર + વત્યાં(મ્), યદુ + વૃદ્ધાન્

શ્રીમદ્ ભાગવત નો આ સાર
ભગવદ્ ભક્તિ જ આધાર

શ્રીભગવાનુવાચ
એતે વૈ સુમહોત્પાતા, વ્યુત્તિષ્ઠન્તીહ સર્વતઃ ।
શાપશ્ચ નઃ(ખ્) કુલસ્યાસીદ્, બ્રાહ્મણેભ્યો દુરત્યયઃ ॥૩૪॥

સુમહોત્+ પાતા, વ્યુત્ + તિષ્ઠન્ + તીહ, કુલસ્યા + સીદ્

ન વસ્તવ્યમિહાસ્માભિર્ – જિજીવિષુભિરાર્યકાઃ ।
પ્રભાસં(મ્) સુમહત્પુણ્યં(મ્), યાસ્યામોડદ્યૈવ માચિરમ્ ॥૩૫॥

વસ્તવ્ય + મિહાસ્ + માભિર્ + જિજી + વિષુભિ + રાર્યકાઃ
સુમહત્ + પુણ્યં(મ્), યાસ્યામોડ + દ્યૈવ

યત્ર સ્નાત્વા દક્ષશાપાદ્, ગૃહીતો યક્ષ્મણોડુરાટ્ ।
વિમુક્તઃ(ખ્) કિલ્બિષાત્ સદ્યો, ભેજે ભૂયઃ(ખ્) કલોદયમ્ ॥૩૬॥

યક્ષ્મણો + ડુરાટ્

વયં(ઞ) ચ તસ્મિન્નાપ્લુત્ય, તર્પયિત્વા પિતૄન્ સુરાન્ ।
ભોજયિત્વોશિજો વિપ્રાન્, નાનાગુણવતાન્ધસા ॥૩૭॥

તસ્મિન્ + નાપ્લુત્ય, ભોજયિત્વો+ શિજો, નાના + ગુણ + વતાન્ધસા

તેષુ દાનાનિ પાત્રેષુ, શ્રદ્ધયોપ્ત્વા મહાન્તિ વૈ ।
વૃજિનાનિ તરિષ્યામો, દાનૈર્નૌભિરિવાર્ણવમ્ ॥૩૮॥

શ્રદ્ધ+ યોપ્ત્વા, દાનૈર્+ નૌભિ + ણવમ્

શ્રીશુક ઉવાચ
એવં(મ્ ભગવતાઽઽદિષ્ટા, યાદવાઃ(ખ્) કુલનન્દન ।
ગન્તું(ઙ્) કૃતધિયસ્તીર્થં(મ્), સ્યન્દનાન્ સમયૂયુજન્ ॥૩૯॥

કૃત + ધિયસ્ + તીર્થં(મ્), સમયૂ + યુજન્

તન્નિરીક્ષ્યોદ્ધવો રાજન્, શ્રુત્વા ભગવતોદિતમ્ ।
દૃષ્ટવારિષ્ટાનિ ઘોરાણિ, નિત્યં(ઙ્) કૃષ્ણમનુવ્રતઃ ॥૪૦॥

તન્ + નિરીક્ષ્યોદ્ + ધવો, ભગવતો + દિતમ્, દૃષ્ટવા + રિષ્ટાનિ, કૃષ્ણ + મનુવ્રતઃ

શ્રીમદ્ ભાગવત નો આ સાર
ભગવદ્ ભકિત જ આધાર

વિવિક્ત ઉપસં(ઙ્)ગમ્ય, જગતામીશ્વરેશ્વરમ્ ।
પ્રણમ્ય શિરસા પાદૌ, પ્રાં(ઞ્) જલિસ્તમભાષત ॥૪૧॥

જગતા + મીશ્ + વરેશ્ + વરમ્, પ્રાં(ઞ્)જલિસ્ + તમ + ભાષત

ઉદ્ધવ ઉવાચ
દેવદેવેશ યોગેશ, પુણ્યશ્રવણકીર્તન ।
સં(વ્) હૃત્યૈતત્ કુલં(ન્) નૂનં(મ્), લોકં(મ્) સન્ત્યક્ષ્યતે ભવાન્ ।
વિપ્રશાપં(મ્) સમર્થોઽપિ, પ્રત્યહન્ન યદીશ્વરઃ ॥૪૨॥

પુણ્ય + શ્રવણ + કીર્તન, સં(વ્)હૃત્યૈ + તત્, સન્ + ત્યક્ષ્યતે, પ્રત્યહન્ + ન

નાહં(ન્) તવાઙ્ઘ્રિકમલં(ઙ્), ક્ષણાર્ધમપિ કેશવ ।
ત્યક્તું(મ્) સમુત્સહે નાથ, સ્વધામ નય મામપિ ॥૪૩॥

તવાઙ્ઘ્રિ + કમલં(ઙ્), ક્ષણાર્ + ધમપિ

તવ વિક્રીડિતં(ઙ્) કૃષ્ણ, નૃણાં(મ્) પરમમઙ્ગલમ્ ।
કર્ણપીયૂષમાસ્વાદ્ય, ત્યજન્ત્યન્યસ્પૃહાં(ઞ્) જનઃ ॥૪૪॥

કર્ણ+ પીયૂ+ ષમાસ્ + વાદ્ય, ત્યજન્ત્યન્ + યસ્પૃહાં(ઞ્)

શય્યાસનાટનસ્થાનસ્ - નાનક્રીડાશનાદિષુ ।
કથં(ન્) ત્વાં(મ્) પ્રિયમાત્માનં(મ્), વયં(મ્) ભક્તાસ્ત્યજેમહિ ॥૪૫॥

શય્યા + સના + ટનસ્ + થાનસ્ + નાન + ક્રીડા + શનાદિષુ, ભક્તાસ્ । ત્યજેમહિ

ત્વયોપભુક્તસ્રગ્ગન્ધ - વાસોઽલઙ્કારચર્ચિતાઃ ।
ઉચ્છિષ્ટભોજિનો દાસાસ્ - તવ માયાં(ઞ્) જયેમહિ ॥૪૬॥

ત્વયોપ + ભુક્તસ્ + રગ્ + ગન્ધ, વાસોઽ + લઙ્કાર + ચર્ચિતાઃ, ઉચ્છિષ્ટ + ભોજિનો

વાતરશના ય ઋષયઃ(શ્), શ્રમણા ઊર્ધ્વમન્થિનઃ ।
બ્રહ્માખ્યં(ન્) ધામ તે યાન્તિ, શાન્તાઃ(સ્) સં(ન્)ન્યાસિનોઽમલાઃ ॥૪૭॥

ઊર્ધ્વ + મન્થિનઃ, સં(ન્)ન્યા + સિનોઽ + મલાઃ

શ્રીમદ્ ભાગવત નો આ સાર
ભગવદ્ ભક્તિ જ આધાર

વયં(ન્) ત્વિહ મહાયોગિનણ, ભ્રમન્તઃ(ખ્) કર્મવર્ત્મસુ ।
ત્વદ્વાર્તયા તરિષ્યામસ્ - તાવકૈર્દુસ્તરં(ન્) તમઃ ॥૪૮॥

ત્વદ્ + વાર્તયા, તાવકૈર્ + દુસ્તરં(ન્)

સ્મરન્તઃ(ખ્) કીર્તયન્તસ્તે, કૃતાનિ ગદિતાનિ ચ ।
ગત્યુત્સ્મિતેક્ષણક્ષ્વેલિ, યન્નૃલોકવિડમ્બનમ્ ॥૪૯॥

કીર્તયન્ + તસ્તે, ગત્યુત્ + સ્મિતે + ક્ષણ + ક્ષ્વેલિ,યન્ + નૃલોક + વિડમ્બનમ્

શ્રીશુક ઉવાચ
એવં(મ્) વિજ્ઞાપિતો રાજન્, ભગવાન્ દેવકીસુતઃ ।
એકાન્તિનં(મ્) પ્રિયં(મ્) ભૃત્ય - મુદ્ધવં(મ્) સમભાષતઃ ॥૫૦॥

મુદ્ + ધવં(મ્)

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહં(વ્)સ્યાં(મ્)
સં(વ્)હિતાયામેકાદશસ્કન્ધે ષષ્ઠોઽધ્યાયઃ ॥

ૐ પૂર્ણમદઃ(ફ્) પૂર્ણમિદં(મ્)પૂર્ણાત્પૂર્ણમુદચ્યતે
પૂર્ણસ્ય પૂર્ણમાદાય પૂર્ણમેવાવશિષ્યતે ॥
ૐ શાન્તિઃ(શ્) શાન્તિઃ(શ્) શાન્તિઃ ॥

